30-10-2020

# शास्त्री

साहित्यम् । छन्दविचार: ।

प्रश्न: →

"पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-
रन्त: प्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्व: पातु शून्येक्षणघटितलयब्रह्मलग्न: समाधि: ॥"

श्रीशूद्रक / मृच्छकटिकम् - 1 / 1

प्रदत्ते श्लोके छन्दालङ्कारनिर्णयं कुरुत ।

उत्तरम् → प्रदत्तस्य पद्यस्य प्रत्येके चरणे एकविंशति अक्षरा: सन्ति । अतएवात्र प्रकृतिछन्दस्य भेद: अस्ति ।

यगणादिनिर्णय: →

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो,

| SSS | SIS | SII | III | ISS | ISS | ISS |
|---|---|---|---|---|---|---|
| मगण | रगण | भगण | नगण | यगण | यगण | यगण |

अथ प्रकृत्या: तमं भेदं स्रग्धरानामकं लक्ष्यति । यस्य लक्षणमस्ति → "म्रभ्नैर्यानां त्रयेण, त्रिमुनियतियुता, स्रग्धरा कीर्तितेयम्"

अलङ्कार: → समाधि: पातु, इति असम्भवत्वात् पर्यायोक्तालङ्कार: लक्षणम् → पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ।

अस्मिन् पद्ये आडम्बरबन्धत्वात् गौडी रीति:, विकटबन्धत्वात् ओजगुण: ।

30-10-2020

डॉ० निर्मलकुमार झा (स० प्राचार्य:)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

30-10-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्य प्रथमपत्रम् ।

प्रश्नपत्रस्वरूपम् । 2020

1. भूभृत् शब्दस्य रूपं प्रथमाविभक्तेः एकवचने रूपं लिखत ।

उत्तरम् → भूभृत् ।

2. 'पठति' पदं कस्य शब्दस्य कस्याः विभक्तेः कस्मिन् वचने रूपमस्ति ?

उत्तरम् → अत्र 'पठति' शतृ प्रत्ययान्तं पुल्लिङ्गं विशेषणपदमस्ति । न तु क्रियापदम् ।

पठति पदं पठत् शब्दस्य सप्तमी, एकवचने रूपमस्ति ।

3. श्रीमती / श्रीमति पदयोर्मध्ये किमन्तरम् ?

उत्तरम् →

श्रीमत् शब्दस्य पुल्लिङ्गे, सप्तमी एकवचने रूपं भवति श्रीमति ।

श्रीमान् शब्दस्य स्त्रीलिङ्गे रूपं 'श्रीमती' अस्ति ।

श्री + मतुप् + ङीप् = श्रीमती ।

4. राज्ञि अथवा राजनि पदं कस्य शब्दस्य कस्याः विभक्तेः कस्मिन् वचने रूपम् अस्ति ?

उत्तरम् → राजन् शब्दस्य सप्तमी, एकवचने रूपम् ।

5. अष्टन् अथवा पञ्चन् शब्दस्य रूपाणि सर्वासु विभक्तिषु लिखत ।

उत्तर → अस्य प्रश्नस्य उत्तरं पूर्वं मया दत्तमस्ति ।

30-10-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

30-10-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

Page No.:
Date: / /

प्रश्नपत्रस्वरूपम् । 2020

1. राम शब्दस्य रूपं द्वितीयाविभक्तेः बहुवचने रूपं लिखत ।

उत्तरम् → रामान् ।

2. दधि शब्दस्य रूपाणि सप्तमीविभक्तेः त्रिषु वचनेषु लिखत ।

उत्तरम् → दध्नि/दधनि, दध्नोः, दधिषु ।

3. 'गवि' पदं कस्य शब्दस्य कस्याःविभक्तेः कस्मिन् वचने रूपमस्ति ?

उत्तरम् → गो शब्दस्य सप्तमीविभक्तेः एकवचने रूपमस्ति ।

4. 'सर्वेण' पदं कस्य शब्दस्य कस्याः विभक्तेः कस्मिन् वचने रूपमस्ति ?

उत्तरम् → सर्वेण पदं सर्व (पुल्लिङ्गम्) शब्दस्य तृतीया, एकवचने रूपमस्ति ।

5. 'वारि' (इकारान्तः, क्लीवलिङ्गम्) शब्दस्य रूपं सर्वासु विभक्तिषु वचनेषु च लिखत ।

उत्तरम् → अस्य शब्दस्य रूपाणि पूर्वे मया लिखितमस्ति ।

6. 'दृश्' धातोः रूपाणि लृट्लकारे सर्वेषु पुरुषेषु वचनेषु च लिखत ।

उत्तरम् →

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः - | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपु० - | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तम पु० - | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

शिष्टानि प्रश्नानि अन्येद्युः ।

30-10-2020

डॉ० निर्मलकुमार झा (स०प्राचार्यः
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ